# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 6 | गुणाः – ५० |
| विषयः – फलितज्योतिषम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १९/०७/२०२१ | सन्दर्भग्रन्थः – सर्वार्थचिन्तामणिः, प्रश्नभूषणम् | |

**सूचना -** **निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या ।**

१ भौमाच्छविच्चन्द्ररविज्ञशुक्रवक्रेज्यमन्दाऽर्किसुतामरेज्या ।
मेषादिभानामधिपाः क्रमेण तदंशकानामपि ते भवेयुः ॥

२ मन्दारसौम्यगुरुशुक्रशशाङ्कसूर्या ।
नैसर्गिकाख्यबलिनः खचराः क्रमेण ॥

३ लग्नेशे स्वोच्चमित्रांशे स्वनवांशगतेऽपि वा ।
शुभग्रहयुते दृष्टे देहसौख्यं विनिर्दिशेत् ॥

**प्रश्नः २ ग्रहाणां पञ्चधा-मैत्रीविचारः क्रियताम् ।**

**प्रश्नः ३ तनुभावविचारः क्रियताम् ।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः व्याख्या कार्या ।**

१ सहजेन सहजविक्रमौषधसहायान् गलोरस्थानम् ।
विद्याद्दक्षिणकर्णं भक्ष्यविशेषांश्च मूलादीन् ॥

२ पुत्रस्थाने तदीशे वा गुरौ वा शुभवीक्षिते ।
शुभेन सहिते वाऽपि पुत्रप्राप्तिर्न संशयः ॥

३ युवतिपदादुद्वाहं भार्यापतिसूपदधिगुडक्षीरम् ।
आगमगमनमदार्तिं ब्रूयान्मूत्राशयं च नष्टधनम् ॥

**प्रश्नः ५ पुत्रप्राप्तियोगान् वर्णयत ।**

**प्रश्नः ६ तृतीयभावस्य फलविचारः क्रियताम् ।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः व्याख्या कार्या ।**

१ शान्तो विवेकी शुद्धात्मा हिरण्यमणिसत्फलैः ।
दैवज्ञं प्रेमभावेन सम्पूज्यार्थं निवेदयेत् ॥

२ मित्रक्षेत्रे स्वोच्चे स्वहोरायां स्वभवनत्रिकोणे च ।
स्वद्रेष्काणे स्वांशे स्वदिने च बलान्विताः सर्वे ॥

३ सिंहे रविः शशी भौमो निधने शनिनेक्षितः ।
शस्त्रकोपं वदेत्तत्र यदि लग्ने शुभो न हि ॥

**प्रश्नः ८ ग्रहाणां बलाबलविचारः क्रियताम् ।**

**प्रश्नः ९ गर्भाध्यायं प्रतिपादयत ।**

**प्रश्नः १० दशानां प्रश्नानामुत्तरं लिखत ।**

१ 'सर्वार्थचिन्तामणिः' इत्यस्य रचयिता कः ?
२ मनसः कारकग्रहः कः ?
३ दुःखस्य कारकग्रहः कः ?
४ ब्राह्मण-संज्ञकौ ग्रहौ कौ ?
५ पूर्वदिशः स्वामी ग्रहः कः ?
६ दक्षिणदिशः स्वामी ग्रहः कः ?
७ नपुंसकग्रहौ कौ ?
८ 'प्रश्नभूषणम्' इत्यस्य रचनाकारः कः ?
९ 'कोशः' इति कस्य भावस्य संज्ञा ?
१० 'आप्तिः' इति कस्य भावस्य संज्ञा ?
११ पराक्रमस्य विचारः कस्मात् भावात् क्रियते ?
१२ सुखस्य विचारः कस्मात् भावात् क्रियते ?
१३ बुधस्य मित्रग्रहाः के ?
१४ सूर्यस्य मूलत्रिकोण-राशिः कः ?
१५ अस्त-भावः कः ?

****